२. मधुपर्क—ज्योतिष्टोम यज्ञ और अश्वमेघयज्ञ करने से जो पुण्य प्राप्ति होती है वह सब मधुपर्क में प्रतिष्ठित है।

५. नीलहर्षादि भेदेन यद् बाह्याभ्यन्तरं जगत्।
अहमित्यामृशन्पूर्णो भैरवः समुदाहृतः॥

६. देह प्राण सुखादीनां न्यग्भावाद् भक्त संहतेः।
या चिदात्मनि विश्रान्तिर्नमः शब्देन सोच्यते॥

७. त्रयी सप्तचतुर्युग्ममये त्रितयवर्त्मनि।
स्थितो यः शक्ति सहितः स जयत्यमृतेश्वरः॥

८. आत्मेन्दुधामनि युगेश नरेश पुत्र-
चित्रां त्रिशूल बिलधामनि सृष्टशक्तिम्।
वैसर्गिके चितिपदेऽप्यथ पुण्डरीकां
काञ्चित्परां त्रिकपरां प्रणमामि देवीम्॥

९. श्रीमत्सदाशिव पदेऽपि महोग्र काली
भीमोत्कट भ्रुकुटिरेष्यति भंगभूमिः।
इत्याकलय्य परमां स्थितिमेत्य काल-
संकर्षिणीं भगवतीं हठतोऽधितिष्ठेत्॥

१०. तन्मध्ये तु परादेवी दक्षिणे च परापरा
अपरा वामश्रृंगे तु मध्यश्रृंगोर्ध्वतः श्रृणु।
या सा संकर्षिणी काली परातीता व्यवस्थिता॥

११. कृत्वाधार धरां चमत्कृति रस प्रोक्षाक्षण क्षालिता-
मात्तैर्मानसतः स्वभावकुसुमैः स्वामोदसंदोहिभिः।
आनन्दामृतनिर्भर स्वहृदयानर्घार्घपात्र क्रमात्
त्वां देव्या सह देहदेव सदने देवार्चयेऽहर्निशम्॥

१२. नाना स्वाद रसामिमां त्रिजगतीं हृच्चक्रयन्त्रार्पिताम्
ऊर्ध्वाधस्त विवेक गौरवभरान्निष्पीड्य निष्यन्दितम्।
यत्संवित्परमामृतं मृतिजराजन्मापहं जृम्भते
तेन त्वां हविषा परेण परमे सन्तर्पयेऽहर्निशम्॥

१३. कालाग्नि रुद्रात्प्रसूतं च तेजो
भूरि स्फुटं दीप्ततरं विचिन्त्यम्।
ऊर्ध्वे स्थिता चन्द्रकला च शान्ता
पूर्णामृतानन्दरसेन देवि॥

१४. तदोभयोर्वह्नि विषानुयोगात्
तेजश्शशांकौ द्रवितौ च यस्मात्।
तेजश्शशांक स्फुट मिश्रितत्वात्
भवेत् तदार्क त्ववताररूपम्॥

१५. परस्पर समाविष्टौ चन्द्रेऽग्नीष्टीटिभे शशी
चन्द्रं सृष्टिं विजानीयादग्निः संहार उच्यते
अवतारो रवि प्रोक्तो मध्यस्थः परमेश्वरः॥

१६. ततः सकाशात्प्रभवाप्ययौ स्तो
यस्मादयं विश्वसमग्रभेदः।
एतच्च विद्वान् विदितार्थभावो
ध्यायेत युक्त्यात्मचिदर्करूपम्॥

१७. द्वारेशा नवरन्ध्रगा हृदयगो वास्तुर्गणेशो महान्
शब्दाद्या गुरवः समीरदशकं त्वाधारशक्त्यात्मकम्।
चिद्देवोऽथ विमर्शशक्ति सहितः षाड्गुण्यमंगावलि-
र्लोकेशाः करणानि यस्य महिमा तं नेत्रनाथं स्तुमः॥

१८. विगलति भवदौर्गत्यं मोक्षश्री श्रयति हृत्कजं कचति।
प्रसरति परमानन्दो यत्र तदीशार्चनं जयति॥

१९. कर्पूर गौरं करुणावतारं संसार सारं भुजगेन्द्र हारम्।
सदा वसन्तं हृदयारविन्दे भवं भवानी सहितं नमामि॥

२०. क्लेशान्विनाशय विकासय हृत्सरोज-
मोजो विजृम्भय निजं नरिनर्तयांगम्।

चेतश्चकोर चिति चन्द्र मरीचि चक्रं
आचम्य सम्यगमृतीकुरु विश्वमेतत्॥

२१. भवन्मय स्वात्म निवास लब्ध-
सम्पद्भराभ्यर्चित युष्मदंघ्रिः।
न भोजनाच्छादनमप्यजस्र-
मपेक्षते यस्तमहं नतोऽस्मि॥

२२. आधीनामगदं दिव्यं व्याधीनां मूलकृन्तनम्।
उपद्रवाणां दलनं महादेवमुपास्महे॥

२३. ध्याये नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलांगं परशु मृगवराभीति हस्तं प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणैः व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिल भयहरं पंचवक्त्रं त्रिनेत्रम्॥

२४. त्वय्येव भातः स्मृति-विस्मृती ते
द्वयोरपि त्वं स्वयमेव भासि।
तथापि सांमुख्य सुखाभिवर्षिणी
स्मृतिः प्रिया ते नहि विस्मृतिर्मे॥

२५. महेश्वरे वा जगतामधीश्वरे जनार्दनेवा जगदन्तरात्मनि।
न कापि भेदप्रतिपत्तिरस्ति मे तथापि भक्तिस्तरुणेन्दु शेखरे॥

२६. भानुना तुहिनभानुना बृहद्भानुना च विनिवर्तितं न यत्।
येन तज्झगिति शान्तिमान्तरं ध्वान्तमेति तदुपास्महे महः॥

२७. संग्रहेण सुख दुःख लक्षणं मां प्रति स्थितमिदं श्रुणु प्रभो।
सौख्यमेष भवता समागमः स्वामिना विरह एव दुःखिता॥

२८. दासधाम्नि विनियोजितोऽप्यहं स्वेच्छयैव परमेश्वर त्वया।
दर्शनेन न किमस्मि पात्रितः पाद संवहन कर्मणापि वा॥

२९. शक्तिपातसमये विचारणं प्राप्तमीश न करोषि कर्हिचित्।
अद्य मां प्रति किमागतं यतः स्व प्रकाशनविधौ विलम्बसे।।
हर! विश्वाखिलाधार! निराधार! निराश्रय!।
पुष्पांजलिं इमं शम्भो! गृहाण वरदो भव।।
भगवते भवाय देवाय, शर्वाय देवाय, रुद्राय देवाय, पशुपतये देवाय, उग्राय देवाय, महादेवाय, भीमाय देवाय, ईशानाय देवाय पार्वती सहिताय परमेश्वराय ॐ जुं सः अमृतेश्वर भैरवाय पुष्पांजलिं समर्पयामिनमः।।
अब अमृतेश्वर भैरव को नीचे दिये गये मन्त्र को पढ़ने के पश्चात् फल सामने रखे–
राजराजाधिदेवेश! निराधार! निरास्पद!।
फलं गृहाण मत् दत्तं नारिकेलादिकं शुभम्।।
भगवते भवाय देवाय, शर्वाय देवाय, रुद्राय देवाय, पशुपतये देवाय, उग्राय देवाय, महादेवाय, भीमाय देवाय, ईशानाय देवाय पार्वती सहिताय परमेश्वराय ॐ जुं सः अमृतेश्वर भैरवाय फलं समर्पयामि नमः।।
अब अमृतेश्वर भैरव को ताम्बूल चढ़ाना–
(सब्ज़ इलायची छोटी, लौंग, काली मिर्च, सुपारी, छुआरा, सोगी को इकट्ठा करके पात्र में रख के ताम्बूल बनता है)
शाश्वतात्ममहानन्द! मदनान्तक! धूर्जटि!
गृहाण पूग ताम्बूल दल पत्रादि संयुतमू।।
भवाय देवाय, शर्वाय देवाय, रुद्राय देवाय, पशुपतये देवाय, उग्राय देवाय, महादेवाय, भीमाय देवाय, ईशानाय देवाय पार्वती सहिताय परमेश्वराय ॐ जुं सः अमृतेश्वर भैरवाय ताम्बूलं परिकल्पयामि नमः।।

मन से आधी परिक्रमा करें–

यानि कानि च पापानि ब्रह्महत्यादिकानि च।
तानि सर्वाणि नश्यन्ति शिवस्यार्ध [1]प्रदक्षिणात्॥

अब अमृतेश्वर को अष्टांग प्रणाम नीचे दिये मन्त्र को पढ़कर करे–

मृड़ानीशाद्य मे सर्वान् अपराधान् अनेकशः।
क्षम स्वामिन् प्रणामं मे गृहाणाष्टांग संयुतम्॥
उभाभ्यां जानुभ्यां पाणिभ्यां शिरसा उरसा।
मनसा वचसा च नमस्कारं करोमि नमः॥

पानी (निर्माल्य में) डालना पात्र से–

अन्नं नमः अन्नं नमः आज्यं आज्यं अद्यादिनेऽद्य
यथा संकल्पात् सिद्धिरस्तु अन्नहीनं क्रिया हीनं
विधिहीनं द्रव्यहीनं मन्त्रहीनं च यत् गतं
तत् सर्वं अच्छिद्रं अस्तु। एवं अस्तु। इति श्री अमृतेश्वर-
भैरवस्य अङ्गीकरणम्॥

अब पानी वाले पात्र में से दायें हाथ पर पानी डालकर वापिस पात्र में नीचे लिखे मन्त्र से डाले–

शन्नो देवीरभिष्टये आपो भवन्तु पीतये शंय्योरभिवन्तु नः॥

अब इस पानी को अमृतेश्वर भैरव के पास

भगवते भवाय देवाय, शर्वाय देवाय, रुद्राय देवाय, पशुपतये देवाय, उग्राय देवाय, महादेवाय, भीमाय देवाय, ईशानाय देवाय पार्वती सहिताय परमेश्वराय ॐ जुं सः अमृतेश्वर

---

१. कहा है – एका चण्ड्या रवेः सप्त तिस्रः कार्या विनायके।
हरेश्चतस्रः कर्तव्याः शिवस्यार्ध प्रदक्षिणा॥
अर्थात् देवी की एक प्रदक्षिणा, सूर्य की सात बार, गणेश की तीन बार विष्णु की चार बार और शंकर की अर्ध प्रदक्षिणा करनी चाहिए।

भैरवाय अपोशानं नमः यह कहकर डाले।

यदि दक्षिणा डालनी हो तो फिर शन्नो देवीरभिष्टये आपो भवन्तु पीतये शंय्योरभिस्रवन्तु नः। यह पढ़कर पानीवाले पात्र में से दायें हाथ पर पानी डालकर वापिस पात्र में डाले और उस पानी से दक्षिणा को गीला करके भगवते भवायदेवाय अमृतेश्वर भैरवाय दक्षिणायै-तिलहिरण्यरजत निष्कर्णंददानि। एताः देवताः सदक्षिणा अनेन प्रीयन्तां प्रीताः सन्तु॥ यदि नैवेद्य अर्पण करना हो तो नैवेद्य विधिपूर्वक रखकर विजयेश्वर जन्त्री में लिखा हुआ नैवेद्यमन्त्र पढ़कर जुं सः अमृतेश्वर भैरवाय नमः यह मन्त्र दस बार पढ़कर नैवेद्य चढ़ावे॥

विगलति भवदौर्गत्यं मोक्ष श्री श्रयति हृत्कजं कचति।
प्रसरति परमानन्दो यत्र तदीशार्चनं जयति॥३॥

यह तीन बार पढ़ कर फूल चढ़ाये॥ फिर हाथ में दो कुशा काण्ड और अक्षत लेके

तन्महेशाय विद्महे वाग्विशुद्धाय धीमहि
तन्नः अमृतेश्वरभैरवः प्रचोदयात्॥

तीन बार पढ़कर तत्सद् ब्रह्म॰

भगवतो भवस्य देवस्य, शर्वस्य देवस्य रुद्रस्य देवस्य पशुपतेः देवस्य उग्रस्य देवस्य महादेवस्य ईशान देवस्य अमृतेश्वर भैरवस्य

पूजनमच्छिद्रं सम्पूर्णं अस्तु एवमस्तु॥

अब पानी में जौ दाने डालकर पढ़े–

एताभ्यो देवताभ्यो यवोदकं नमः उदकतर्पणं नमः॥

अब हाथ में फूल लेकर साष्टांग प्रणाम करते हुए पढे–

आपन्नोस्मि शरण्योसि सर्वावस्थासु सर्वदा।
भगवंस्त्वां प्रपन्नोस्मि रक्ष मां शरणागतम्॥

आह्वानं नैव जानामि नैव जानामि पूजनम्।
पूजाभागं न जानामि क्षम्यतां परमेश्वर!।।
उभाभ्यां जानुभ्यां पाणिभ्यां शिरसा उरसा वचसा मनसा नमस्कारं करोमि नमः।

अब पानी (निर्माल्य में) डालते हुए पढ़िये–

नमो ब्रह्मणे नमो अस्त्वग्नये, नमः पृथिव्यै नमः, ओषधिभ्यः, नमोवाचे, नमो वाचस्पतये, नमो विष्णवे, बृहते कृणोमि। इत्येतासामेव देवतानां सलोकतां सायुज्यं सार्ष्टिं सामीप्यं आप्नोति य एवं विद्वान् स्वाध्यायं अधीते।। अमृतेश्वरभैरवस्य अंगीकरणम्। सत्याः सन्तु यजमानस्य कामाः।।

फूल अमृतेश्वर पर चढ़ाना–

पूजितोसि मया भक्त्या भगवन् गिरिजापते!।
स गौरीको मम स्वान्तं विश विश्रान्ति हेतवे।।

जय गुरुदेव।

जप[1] विधि :–

अब एक माला (१०८) मन्त्र जाप करना। पहिले संकल्प के लिए पानी (निर्माल्य में) डालना–

संकल्प विधि

तत् सत् ब्रह्म अद्यतावत् तिथौ अद्य
अमुक मासस्य कृष्ण/शुक्लपक्षस्य तु महापर्वणि

---

१. जप– जन्मान्तर सहस्रेषु कृतपाप प्रणाशनात्।
परदेव प्रकाशात् च जप इत्यभिधीयते।।

तन्त्रों में कहा है कि हजारों जन्मों में किये गये पापों को नष्ट करने से और परमात्म देव का प्रकाशन करने से 'जप' इन दो वर्णों (ज, प) का अतीव माहात्म्य कहा गया है।

अमुक तिथौ अमुक वासरान्वितायां श्री अमृतेश्वरभैरवस्य प्रसन्नार्थे श्री सद्‌गुरु प्रसाद प्राप्त्यर्थे अमृतेश्वर भैरवस्य जपे विनियोगः।

न्यासः=जुं हृदयाय नमः, व्यों शिरसे स्वाहा ईं शिरवायै वौषट्, ज्यों नेत्रत्रयाय वषट् फट् अस्त्राय फट्। जुं अंगुष्ठाभ्यां नमः, व्यों तर्जनीभ्यां नमः। ईं मध्यमाभ्यां नमः, ज्यों अनामिकाभ्यां नमः। फट् कनिष्ठिकाभ्यां नमः। प्राणायामः (ॐ जुं सः अमृतेश्वर भैरवाय नमः इसी मन्त्र से। पूर्वोक्त विधि के अनुसार ध्यानम् – अन्तरालीन से लेकर सजयत्यमृतेश्वरः तक पढ़िये। फिर माला को हाथ में लेकर नीचे दिये मन्त्र से पूजन एवं प्रार्थना करे–

> **मां माल्ये महामाल्ये सर्व शक्ति स्वरूपिणि!।**
> **चतुर्वर्गस्त्वयि न्यस्तस्तस्मात् मे सिद्धिदाभव।।**
> **अविघ्नं कुरु माले त्वं गृह्णामि दक्षिणे करे।**
> **जपकाले च सिद्ध्यर्थं प्रसीद ममसिद्धये।।**

फिर "ॐ जुं सः अमृतेश्वर भैरवाय नमः" इसी मन्त्र से जप करे। जप के पश्चात् फिर प्राणायाम करे पूर्वोक्त विधि के अनुसार और पानी डालते हुए पढ़े–

> **अनेन अमृतेश्वर भैरवमन्त्र जपेन श्री अमृतेश्वर भैरवः प्रीयतां प्रीतोऽस्तु।**

फिर सिर पर माला रखकर पढ़े–

> **गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्।**
> **सिद्धिर्भवतु मे देव! त्वत्प्रसादान्महेश्वर।।**

जय गुरुदेव।

जप के विषय में ध्यान देन योग्य बातें –

१. भगवान श्री कृष्ण ने गीता में कहा है :–
"यज्ञानां जपयज्ञोऽस्मि" अर्थात् यज्ञों में मैं जपयज्ञ हूँ।

२. तन्त्रों में कहा है कि–
जपयज्ञात् परो यज्ञो नापरोऽस्तीह कश्चन।
तस्मात् जपेन धर्मार्थ काममोक्षांश्च साधयेत्॥
अर्थात् जपयज्ञ से दूसरा यज्ञ संसार में उत्तम नहीं है। अतः जप से ही धर्म अर्थ काम और मोक्ष को प्राप्त करें।

३. जप तीन प्रकार का होता है–
वाचिक, उपांशु और मानस।
इनमें से वाणी से मन्त्र का स्पष्ट उच्चारण वाचिक जप है। जिससे दूसरों को शब्द सुनाई न दे, इस प्रकार जरा जरा सा ओंठ हिलाकर सूक्ष्म उच्चारण पूर्वक मन्त्र का जप उपांशु जप कहलाता है। मन बुद्धि के द्वारा मन्त्र के वर्ण, शब्द और अर्थ का चिन्तन करना मानस जप है। इनमें से वाचिक जप से उपांशु जप और उपांशु जप से मानस जप श्रेष्ठ है॥

४. जपकी सिद्धि के लिए, मन में संतोष, पवित्रता, मौनभाव और मन्त्र के अर्थ का विचार करना, उद्वेग एवं खेद का न होना आवश्यक है।

५. अपने दायें हाथ को सदा वस्त्र से ढ़ककर तथा पवित्रक धारण किये जप करे वही जप सफल होता है। जो ऐसा नहीं करता उसका जप निष्फल होता है। कहा है व्यास स्मृति में–
वस्त्रेणाच्छाद्य तु करं सपवित्रं सदा जपेत्।
तस्य स्यात् सफलं जाप्यं तत् हीनं अफलं मतम्॥

६. मन्त्र जप की गिनती अवश्य रखनी चाहिए क्योंकि बिना संख्या

का जप आसुर जप कहलाता है कहा है बृहत् पराशर संहिता में–

असंख्यमासुरं यस्मात् तस्मात् तत् गणयेत् ध्रुवम्।

और भी कहा है –

व्यग्रचित्तेन यत् जप्तं यत् जप्तं मेरुलंघने।
असंख्यातं तु यत् जप्तं, तत् सर्वं निष्फलं भवेत्॥

७. **प्रातर्नाभौ करं कृत्वा मध्याह्ने हृदि संस्थितम्।**
सायं जपेत् च नासाग्रे एष जप्यविधिः स्मृतः।
अर्थात् सुबह के समय हाथ नाभि के पास, मध्याह्न में हृदय के पास तथा सायं नासिका के पास रख कर जप करना उत्तम है।

८क. जप के समय किसी से बोलना नहीं चाहिए, अपने शरीर के अंगो को हिलाना नहीं चाहिए। न सिर और न गर्दन हिलाये, न जंभाई करे, न नींद करे, न थूके, न शरीर के निचले अंगों का स्पर्श करे। एकान्त स्थान में स्थिर आसन से बेठकर केवल मन्त्र देवता और मन्त्र के अर्थ का चिन्तन करे। यदि इसके विपरीत जप होता है तो उसका फल राक्षस तथा सिद्ध हरण कर लेते हैं।

८ब. जप करने के समय यदि मन इधर उधर भटकने लगे तो उसे वहां से जबर्दस्ती से हटा कर ध्येय पर लाना चाहिए। भटकने नहीं देना चाहिंए।

९. घर में जप का फल एक गुणा, गाय की समीपता में सौ गुणा पवित्र उद्यान और तीर्थ में हजार गुणा, नदी के तट पर लाख गुणा, देव मन्दिर और गुरु के आश्रम में करोड़ गुणा तथा शिवालय में अनन्त गुणा फल मिलता है।

१०. **यस्मिन् स्थाने जपं कृत्वा शक्रो हरति तज्जपम्।**
तन्मृदा लक्ष्मकुर्वीत ललाटे तिलकाकृति॥
व्यास स्मृति के अनुसार आसन के नीचे की मिट्टी का तिलक माथे पर करे या नीचे के स्थान को अन्त में हाथ लगाकर माथे पर रखे, ऐसा न करने से जप का फल इन्द्र को प्राप्त होता है॥

११. पंचमुखी रुद्राक्ष की माला, लाल चन्दन की माला या तुलसी की माला पर जप करना चाहिए। जप करते समय माला को मध्यमा या अनामिका के प्रथम पर्व पर रखना चाहिए। तर्जनी और कनिष्ठिका से माला को न छुवे।
माला १०८ दानों की होनी चाहिए। माला में रखे सुमेरु (मोटा दाना) को कभी स्पर्श न करे।

१२. माला में १०८ दानें ही क्यों है इस विषय में कहा है कि
रुद्राणां शतमेकंतु भैरवाष्टक योजितम्।
कृत्वा मेरुं महारुद्रं मालाचाष्टोत्तरं शतम्॥
अर्थात् प्रधान रुद्रों की संख्या एक सौ है, भैरवों की संख्या आठ है। इन आठ भैरवों को रुद्रों के साथ मिलाकर एक सौ आठ की संख्या होती है। सुमेरु को महारुद्र, माना जाता है। अथवा—
चतुर्विंशति तत्त्वाश्च नाड्या द्वासप्ततिस्तथा।
द्वादशाङ्गुलमुच्छ्वासो माला चाष्टोत्तरं शतम्॥
अर्थात् पांच ज्ञानेन्द्रिय पांच कर्मेन्द्रिय, पांच तन्मात्र, प्रकृति, पुरुष, मन, बुद्धि, अहंकार, ईश्वर, सदाशिव, शक्ति और शिव, ये २४ तत्त्व, प्रधान ७२ नाडियां और १२ अंगुल आयाम का उच्छ्वास, इस प्रकार इन्हीं १०८ संख्याओं की प्रतीक भूता १०८ दाने की माला मानी जाती है। अथवा
षड्नवत्याङ्गुलायामं स्वदेहं द्वादशाङ्गुलः।
बहिः प्राणो याति चैवं माला चाष्टोत्तरशतम्॥

अर्थात् अपने शरीर का आयाम ९६ अंगुल माना जाता है और प्राण वायु भी १२ अंगुल अन्दर से बाहर निकलती है इस प्रकार इन्हीं १०८ संख्याओं की प्रतीक माला मानी जाती है। अथवा

नवान्ता वर्णिता संख्या कालोऽयं द्वादशावधिः।
हत्वापरस्परं चैवं माला चाष्टोत्तरं शतम्॥

अर्थात् संख्या एक से नौ तक मानी जाती है काल की अवधि बारह है। बारह से नौ को गुणन करके = ९ X १२ = १०८ की संख्या माला की ही प्रतीक है।

श्री कुलार्णवतन्त्र में कहा है कि–

अक्षमाला द्विधा प्रोक्ता कल्पिताऽकल्पितेति च।
कल्पिता मणिभिः क्लृप्ता मातृकास्यादकल्पिता॥

अर्थात् अक्षमाला दो प्रकार की होती है।

कल्पित और अकल्पित। कल्पित माला मणियों (रुद्राक्ष आदि) की माला है। अकल्पिता – आदिक्षान्ता मातृका - अ से क्ष तक के वर्ण समुदाय को मातृका कहते हैं और यही अकल्पिता है।

आदिक्षान्ताक्षवर्णत्वात् अक्षमालेति कीर्तिता।
अनुलोम विलोमाभ्यां गणयेत् मन्त्रवित्तमः॥

अर्थात् 'अ' वर्ण से 'क्ष' वर्ण तक के वर्ण समुदाय से उद्भूत अक्षमाला है। मन्त्र ज्ञाता जप संख्या की गणना इसी के आधार पर अनुलोम (forward order) और विलोम (reverse order) क्रम से करे।

शिवसूत्र में भी कहा है "मातृका चक्र संबोधः" अर्थात् सद्गुरु के प्रसाद से ही शिष्य को अक्षमाला चक्र का ज्ञान होता है। अक्षमाला – अ से क्ष तक (अ आ इ ई से श, ष, स, ह, क्ष तक) के पचास वर्ण की सारे विश्वविस्तार की प्रतीक है। विश्व

शिवतत्त्व (अनुत्तर तत्त्व) से आरंभ होकर पृथिवी तत्त्व में समाप्त होता है। एवं ३६ तत्त्व, इन पचास अक्षरों अर्थात् मातृका शक्ति का प्रतिनिधित्व करते हैं। इसकी महत्ता यहां तक कही गई है कि जो साधक इस वर्ण समुदाय का (अ से क्ष तक) ही केवल सावधान मन से चिन्तन करता है वह असंख्य मन्त्रों का जप करता है क्योंकि सारे मन्त्र इसी वर्ण समुदाय से बने हैं।

स्मरण रहे

न धारयेत् करे मूर्ध्नि कण्ठे च जप मालिकाम्
जपकाले जपं कृत्वा सदा शुद्धस्थले क्षिपेत्॥

अर्थात जिस माला से जप करते हो उस माला को न हाथ में धरें, न गले में डाले। जप के समय जप करने के पश्चात् उसे शुद्ध स्थान पर संभाल के रखें॥

शैवक्रम के अनुसार शैवयोगी के लिए शाक्तोपाय साधना में नियत रूप में मन्त्रों का उच्चारण करना माला आदि को हाथ में धारण करना जप नहीं है अपितु ऐसा शैवयोगी प्राकृतिक पूर्णाहन्ता में प्रविष्ट होकर जो कुछ व्यवहार करता है, या प्राणों की चेष्टाओं का आचरण करता है वह सारा इस योगी के लिए जप ही बन जाता है। इस की सारी चेष्टायें मन्त्ररूपता से ही स्फुरित होती है। चाहिये वह वार्तालाप करे, या कोई श्लोक पढ़े, या गाली गलौच का प्रयोग करे, उठे, बैठे, भ्रमण करे, स्नान करे वह सारा व्यवहार अहं परामर्श की एकता के साथ ही चलता है।

शिवसूत्र में ऐसे योगी के लिए ही कहा है

कथा जपः॥

जय गुरुदेव।

रुद्रपञ्चके चमकानुवाक्यम्।

ॐ नमः शिवाय।
प्रणतोऽस्मि महादेव प्रपन्नोऽस्मि सदाशिव।
निवारय महामृत्युं मृत्युञ्जय नमोऽस्तु ते॥
देवं सुधाकलशसोमकरं त्रिनेत्रं
पद्मासनं च वरदाऽभयदं सुशुभ्रम्।
शङ्खाऽभयाब्जवरभूषितया च देव्या
वामेऽङ्कितं शमनभङ्गहरं नमामि॥
शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम्।
गङ्गाधरं दशभुजं सर्वाभरणभूषितम्॥ १॥
नीलग्रीवं शशाङ्काङ्कं नागयज्ञोपवीतिनम्।
व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदम्॥ २॥
कमण्डल्वक्षसूत्राभ्यामन्वितं शूलपाणिकम्।
ज्वलन्तं पिङ्गलजटाशिखमुद्योतकारिणम्॥ ३॥
अमृतेनाप्लुतं हृष्टमुमादेहार्धधारिणम्।
दिव्यसिंहासनासीनं दिव्यभोगसमन्वितम्॥ ४॥
दिग्देवतासमायुक्तं सुरासुरनमस्कृतम्।
नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमऽव्ययम्॥ ५॥
सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम्।
एवं ध्यात्वा द्विजः सम्यक्ततो यजनमारभेत्॥ ६॥
मृत्युञ्जय महादेव पाहि मां शरणागतम्।
जन्ममृत्युजरारोगैः पीडितं भवबन्धनात्॥ ७॥
आराधितो मनुष्यैस्त्वं सिद्धैर्देवैर्महर्षिभिः।
आवाहयामि भक्त्या त्वां गृहाणार्चां महेश्वर॥ ८॥

हर शम्भो महादेव विश्वेशामरवल्लभ।
शिव शङ्कर सर्वात्मन् नीलकण्ठ नमोस्तु ते।। ९।।
इति विज्ञाप्य देवेशं जपेन्मत्रं च त्र्यम्बकम्।। १०।।
ॐ त्र्यम्बकं यजामहे सुगन्धिं रयिपोषणम/पुष्टिवर्धनं/रोगनाशनं
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्।। ३।।

आ त्वा वहन्तु हरयः सचेतसः, श्वेतैरश्वैरिह केतुमद्भिर्वाताजवेन बलमद्भिर्मनोजवा यातु शीघ्रं मम रुद्राय हव्यन्देवानां च ऋषीणां चासुराणां च पूर्वजं, सहस्राक्षं, विरूपाक्षं, विश्वरूपं, महादेवं, शिवमावाहयाम्यहम्।।

आवाहयाम्यहं देवमीश्वरं पार्वतीपतिम्।
वृषभासनमारूढं नागाभरणभूषितम्।। १।।
प्रीयतां यजमानस्य तुष्टो भूयाज्जगत्पतिः।
शुक्लवर्णो महातेजाः शुक्लस्त्रग्दामभूषितः।
बलिः पुष्पं चरुश्चैव धूपोऽयं प्रतिगृह्यताम्।। २।।
ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि।
तन्नो रुद्रः प्रचोदयात्।। ३।।

ॐशतरुद्रियन्देवानां रुद्रशमनं, भवाय, शर्वायश्च, प्रत्यु-त्क्रान्तानुवाकौ, देवर्षी रुद्रदैवत्यस्त्रिष्टुप्च्छन्दश्चयने विनियोगः। नमस्ते देवा रौद्रमानुष्टुभमाद्या गायत्री, पञ्चमषष्ठ्यौ पांक्त्यन्ता महापंक्तिर्मा भैरेकपदा जगत्यनुष्टुप्त्रिष्टुप् महाबृहती यवमध्या रुद्रो देवता चरमेष्टिका, अस्य रुद्रस्य प्रश्नस्य अनुष्टुप्च्छन्दः अघोर ऋषिः सङ्कर्षणमूर्तिः सुरूपो योऽसावादित्यः परः पुरुषः सएव देवता, अग्निः क्रतुचरुमायामिष्टिकायां शतरुद्रे विनियोगः। सकलस्य रुद्राध्यायस्य श्रीमहारुद्रो देवता एका गायत्री छन्द्रस्तिस्त्रोऽनुष्टुभस्तिस्त्रः पङ्क्तयः, सप्ताऽनुष्टुभौ, द्वे

जगत्यौ, परमेष्ठी ऋषिः, आत्मनो वाङ्मनः कायोपार्जितपाप-
निवारणार्थ सद्‌गुरु प्रसाद प्राप्त्यर्थे चमानुवाक सहितरुद्र-
मन्त्रपाठे/होमे/स्नाने/पुष्पार्चने वा विनियोगः॥

ॐ कर्पूरगौरं करुणावतारं
संसारसारं भुजगेन्द्रहारम्।
सदा वसन्तं हृदयारविन्दे
भवं भवानीसहितं नमामि॥

गात्रं भस्मसितं सितं च हसितं हस्ते कपालं सितं
खट्वाङ्गं च सितं सितं च वृषभं कर्णे सिते कुण्डले।
गङ्गाफेनसितो जटाजलसितश्चन्द्रः सितो मूर्धनि
सोऽयं सर्वसितो दधातु विभवं पापक्षयं शङ्करः॥

"आशुः शिशान इति शुक्रज्योतिष्मानंशुः प्रजननं सर्वाः प्रजाः
कश्यपा इति कश्यपस्य वाजस्य प्रसवोऽग्नेः"॥

ॐ आशुः शिशानो वृषभो न युध्मो घनाघनः क्षोभणश्चर्षणीनाम्।
सङ्क्रन्दनोऽनिमिष एकवीरः, शतं सेना अजयत्साकमिन्द्रः॥ १॥

सङ्क्रन्दनेनाऽनिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना।
तदिन्द्रेण जयत तत्सहध्व युधो नर इषुहस्तेन वृष्णा॥ २॥

स इषुहस्तैः स निषङ्गिभिर्वशी संसृष्टा सयुध इन्द्रो गणेन।
संसृष्टजित्सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता॥ ३॥

बृहस्पते परिधीया रथेन रक्षोहा मित्राँ अपबाधमानः।
प्रभञ्जन्सेनाः प्रमृणो युधा जयन्नऽस्माकमेध्यविता रथानाम्॥ ४॥

बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः।
अभिवीरो अभिषत्वा सहोजिज्जैत्रायनो रथमाऽतिष्ठ गोवित्॥ ५॥

गोत्रभिदङ्गोविदं वज्रबाहुं जयन्तमऽज्मा प्रमृणन्तमोजसा।
इमं स जाता अनुवीरयध्वमिन्द्रसखायमऽनुसं व्ययध्वम्॥ ६॥

अभिगोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः।
दुश्च्यवनः पृतनाषाडऽयुध्योऽस्माकं सेना अवन्तु प्रयत्सु॥ ७॥
इन्द्र एषां नेता बृहस्पतिर्दक्षिणो पुर एतु सोमः।
देवसेनानामभिभञ्जतीनां जयन्तीनां मारुतोयन्तु मध्ये॥ ८॥
इन्द्रस्य वृष्णो वरुणस्य राज्ञः आदित्यानां मरुतां शर्ध उग्रम्।
महामनसां भुवनस्य वानां घोषो देवानां जयतामुदस्थात्॥ ९॥
अस्माकमिन्द्रः समृतेषु ध्वजेष्वऽस्माकं या इषवस्ता जयन्तु।
अस्माकं वीरा उत्तरे भवन्त्वऽस्मान्नु देवा अवता भरेष्वा॥ १०॥
"होम पर खड़ा होके यह आहुति देना"॥

ॐ शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च सत्यश्चर्तपाश्चात्यँहा, ईदृङ्, चान्यादृङ् च, सदृङ्च, प्रतिसदृङ्च, मितश्च, संमितश्च, सभारा, ऋतश्च, सत्यश्च, ध्रुवश्च, धरणश्च, धर्ता, च विधर्ता, च विधारय, ऋतजिच्च, सत्यजिच्च, सेनाजिच्च, सुषेणश्चान्तिमित्रश्च, दूरे अमित्रश्च, गण ईदृक्षास, एतादृक्षास ऊषुणः सदृक्षासः प्रतिसदृक्षास एतान मितासश्च संमितासो नो अद्य सभारसो मरुतो यज्ञे, अस्मिन्निन्द्रं दैवीर्विशो मरुतोऽनु वर्त्मानो यथेन्द्रन्दैवीर्विशो मरुतोऽनु वर्त्मानोऽभवन्नेवमिमं यजमानं दैवीश्च विशो मानुषीश्चानु वर्त्मानो भवन्तु॥

ॐ नमः शिवाय वरदाय ॐ नमस्ते रुद्र मन्यवे।
बाहुभ्यामुत ते नम उत त इषवे नमः॥ १॥
या ते रुद्र शिवा तनूरऽघोराऽपापकाशिनी।
तया नस्तन्वा शन्तमया गिरिशन्ताऽभिचाकशीहि॥ २॥
यामिषुङ्गिरिशन्त! हस्ते बिभर्ष्यऽस्तवे।
शिवां गिरित्र ताङ्कुरु माहिंसीः पुरुषं जगत्॥ ३॥

शिवेन वचसा त्वा गिरिशाच्छा वदामसि।
यथा नः सर्वमिज्जगदऽयक्ष्मं सुमना असत्॥ ४॥
अध्यवोचदधिवक्ता प्रथमो दैव्योभिषक्।
अहींश्च सर्वाञ्जम्भय सर्वांश्च यातुधान्योऽधराचीः परात्सुवः॥ ५॥
असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ये चेमे।
रुद्रा अभितो दिक्षु श्रिताः सहस्राक्षो वैषां हेड ईमहे॥ ६॥
असौ योऽवसर्पति नीलग्रीवो विलोहितः।
उतैनं गोपा अदृश्यन्नुतैनमुदहार्यः॥ ७॥
उतैनं विश्वा भूतानि स दृष्टो मृडयति नः।
नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे॥ ८॥
अथो य अस्य सत्त्वानोऽहन्तेभ्योऽकरं नमः।
प्रमुञ्च धन्वनस्तमुभयो रात्र्योर्ज्याम्॥ ९॥
याश्च ते हस्त इषवः परास्ता भगवो वप।
विज्यं धनुः कपर्दिनो विशल्यो बाणवानुत॥ १०॥
अनेशन्नस्येषव आभूरस्य निषङ्गथिः।
या ते हेतिर्मीढुष्टम् हस्ते बभूव ते धनुः॥ ११॥
तयाऽस्मान्विश्वतस्त्वमयक्ष्मेण परिभुज।
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः॥ १२॥
अथो य इषुधिस्तवारे अस्मन्निधीहि तम्।
नमांसि त आयुधायाऽनातताय धृष्णवे॥ १३॥
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने।
अवतत्य धनुष्ट्वं सहस्राक्ष शतेषुधे॥ १४॥
निशीर्य शल्यानां मुखं शिवो नः सुमना भव।
यात इषुः शिवतमा शिवं बभूव ते धनुः।
शिवा शरव्या या तव तया नो मृड जीवसे॥ १५॥

मानो महान्तुमुत मानो अर्भकं मान उक्षन्तमुत मान उक्षितम्।
मानो वधीः पितरं मोत मातरं मानः प्रियास्तन्वो रुद्र रीरिषः॥ १॥

मानस्तोके तनये मान आयौ मानो गोषु मानो अश्वेषु रीरिषः।
वीरान्मानो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे॥ २॥

नमस्ते अस्तु भगवः, परमेश्वर, विश्वश्वर, महादेव, शिव, सशिव, सदाशिव, त्रिकालकाल, कालाग्निरुद्र, नीलकण्ठ, अमृतेश्वर-भैरव, बहुरूप, अघोर, तत्पुरुष, महामृत्युञ्जय भट्टारक ते नमो नमः॥

अग्नाविष्णू सजोषसे इमा वर्धन्तुवां गिरः, द्युम्नैर्वाजेभिरावृतम्॥
वाजश्चमे, प्रसवश्चमे, प्रयतिश्चमे, प्रसृतिश्चमे, धीतिश्चमे, ऋतुश्चमे, स्वरश्चमे, श्लोकश्चमे, श्रावश्चमे, श्रुतिश्चमे, ज्योतिश्चमे, स्वश्चमे, प्राणश्चमे, व्यानश्चमे, अपानश्चमे, असुचमे, चित्तंचम, आधीतंचमे, वाक्चमे, मनश्चमे, चक्षुश्चमे, श्रोत्रंचमे, दक्षश्चमे, बलंचम, ओजश्चमे, सहश्चम, आत्माचमे, तनूश्चमे, शर्म चमे, वर्म चमे, अङ्गानि चमे, अस्थीनि चमे, परूंषि चमे, शरीराणिचम, आयुश्चमे, जराचमे॥ यज्ञेन कल्पताम्॥

ॐ नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो।
नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो॥
नमः शिष्पिञ्जराय त्विषीमते पथीनाम्पतये नमो।
नमो बभ्लुषाय व्याधिनेऽन्नानाम्पतये नमो॥
नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो।
नमो भवस्य हेत्यै जगतस्पतये नमो॥
नमो रुद्रायाऽततायिने क्षेत्राणाम्पतये नमो।
नमः सूतायाऽहन्त्याय वनानांपतये नमो॥

नमो रोहिताय स्थपतये वृक्षाणां पतये नमो।
नमो मन्त्रिणे वाणिज्याय कक्ष्याणां पतये नमो।।
नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमः।
नम आक्रन्दाय त उच्चैर्घोषाय सत्त्वानां पतये नमो।
नमः कृत्सवीताय धावते पत्तीनां पतये नमः।।
अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः।
द्युम्नैर्वाजेभिरावृतम्।।

ॐ ज्यैष्ठ्यंचम, आधिपत्यं चमे, मन्युश्चमे, भामश्चमे, अमश्चमे, अम्भश्चमे, जेमाचमे, महिमा चमे, वरिमाचमे, प्रथिमाचमे, वर्ष्मा चमे, द्राघ्वाचमे, वृद्धंचमे, वृद्धिश्चमे, सत्यंचमे, श्रद्धाचमे, जगत्चमे, धनंचमे, क्रीडाचमे, मोदश्चमे, वशश्चमे, त्विषिश्चमे, सूक्तंचमे, सुकृतंचमे, जातंचमे, जनिष्यमाणं चमे, वित्तंचमे, वेद्यंचमे, भूतंचमे, भविष्यं चमे, सुगंचमे, सुपथं चमे, ऋद्धंचम, ऋद्धिश्चमे, क्लृप्तं चमे, क्लृप्तिश्चमे, मतिश्चमे, सुमतिश्चमे। यज्ञेन कल्पताम्।।

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो।
नमो निषिङ्गिणे ककुभाय स्तेनानां पतये नमो।। १।।

नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो।
नमो निचराय परिचरायाऽरण्यानां पतये नमो।। २।।

नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो।
नमः सृकायिभ्यो जिघांसद्भ्यो मुष्णतां पतये नमो।। ३।।

नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यः प्रकृन्तानां पतये नमो।
नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो।। ४।।

नम इषुकृद्भ्यो धन्वकृद्भ्यश्चवो नमो।
नम इषुमद्भ्यो धन्वायिद्भ्यश्च वो नमो।। ५।।

नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो।
नम आयच्छद्भ्योऽस्यद्भ्यश्च वो नमो॥ ६॥
नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो।
नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो॥ ७॥
नमः शयानेभ्य आसीनेभ्यश्च वो नमो।
नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो॥ ८॥
नमः सभाभ्यः सभापतिभ्यश्च वो नमो।
नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो॥ ९॥

अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजैभिरावृतम्॥

ॐ शञ्चमे, मयश्चमे, प्रियश्चमे, अनुकामश्चमे, कामश्चमे, सौमनसश्चमे, भगश्चमे, द्रविणं चमे, भद्रंचमे, श्रेयश्चमे, वश्यश्चमे, यशश्चमे, यन्ताचमे, धर्ताचमे, क्षेमचमे, धृतिश्चमे, संवित्चमे, ज्ञातंचमे, विश्वञ्चमे, महश्चमे, सूश्चमे, प्रसूश्चमे, सीरंचमे, लयश्चम, ऋतञ्चमे, अमृतंचमे, अयक्ष्मंचमे, अनामयंचमे, जीवातुश्चमे, दीर्घायुत्वंचमे, अनमित्रं चमे, अभयञ्चमे, सुगंचमे, शयनंचमे, सूषाचमे, सुदिनं चमे॥ यज्ञेन कल्पताम्॥
नम आव्याधिनीभ्यो विविध्यद्भ्यश्च वो नमो।
नम उगणाभ्यस्तृंहतीभ्यश्च वो नमो॥ १॥
नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो।
नमो गणेभ्यो गणपतिभ्य वो नमो॥ २॥
नमः कृच्छ्रेभ्यः कृच्छ्रपतिभ्यश्च वो नमो।
नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो॥ ३॥
नमः सेनाभ्यः सेनानीभ्यश्च वो नमो।
नमो रथेभ्यो वरूथिभ्यश्च वो नमो॥ ४॥

नमो महद्भ्योऽर्भकेभ्यश्च वो नमो।
नमो युवभ्य आशिनेभ्यश्च वो नमो॥ ५॥

नमः क्षुत्तृद्भ्यः संगृहीतृभ्यश्च वो नमो।
नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो॥ ६॥

नमः कुलालेभ्यः कर्मरिभ्यश्च वो नमो।
नमः पुञ्जिष्ठेभ्यो निषादेभ्यश्च वो नमो॥ ७॥

नमः श्वनिभ्यो मृगयुभ्यश्च वो नमो।
नमः श्वभ्यः श्वपतिभ्यश्च वो नमः॥ ८॥

अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजेभिरावृतम्॥
ऊर्क्चमे, सूनृताचमे, पयश्चमे, रसश्चमे, घृतं च मे, मधुचमे, सग्धिश्चमे, सपीतिश्चमे, कृषिश्चमे, वृष्टिश्चमे, जैत्रंचम, औद्भिदंचमे, रयिश्चमे, रायश्चमे, पुष्टंचमे, पुष्टिश्चमे, विभुश्चमे, प्रभुश्चमे, पूर्णं चमे, पूर्णतरंचमे, कुयवं चमे, क्षिति चमे, अन्नं चमे, इक्षुश्चमे, व्रीहयश्चमे, यवाश्चमे, माषाश्चमे, तिलाश्चमे, नीवाराश्चमे, श्यामकाश्चमे, अणवश्चमे, प्रियङ्गवश्चमे, गोधूमाश्चमे, मसूराश्चमे, मुद्गाश्चमे, खल्वाश्चमे॥ यज्ञेन कल्पताम्॥

नमो भवाय च रुद्राय च, नमः शर्वाय च पशुपतये च।
नमो नीलग्रीवाय च शितिकण्ठाय च॥ १॥

नमो व्युप्तकेशाय च कपर्दिने च।
नमः सहस्राक्षाय च शतधन्वने च॥ २॥

नमो गिरिशाय च शिपिविष्टाय च।
नमो मीढुष्टमाय चेषुमते च॥ ३॥

नमो ह्रस्वाय च वामनाय च।
नमो बृहते च वर्षीयसे च॥ ४॥

नष्टो वृद्धाय च संवृध्वने च।
नमोऽग्रयाय च प्रथमाय च॥ ५॥
नमो आशवे चाऽजिराय च।
नमः शीभाय च शीघ्र्याय च॥ ६॥
नम ऊर्म्याय चाऽवस्वन्याय च।
नमो नाद्याय च द्वीप्याय च॥ ७॥

अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजेभिरावृतम्॥
अश्मा च मे, मृत्तिका च मे, गिरयश्चमे, पर्वताश्चमे, सिकताश्चमे, वनस्पतयश्चमे, हिरण्यञ्चमे, अयश्चमे, सीसञ्चमे, त्रपुश्चमे, श्यामंचमे, लोहितायसंचमे, अग्निश्चम, आपश्चमे, वीरुधश्चम, ओषधयश्चमे, कृष्टपच्यञ्चमे, अकृष्टपच्यञ्चमे, ग्राम्याश्चमे, पशव आरण्याश्चमे, वित्तंचमे, वित्तिश्चमे, भूतंचमे, भूतिश्चमे, वसुचमे, वसतिश्चमे, कर्मचमे, शक्तिश्चमे, अर्थश्चम, एमश्चम, इत्याचमे, गतिश्चमे॥ यज्ञेन कल्पताम्॥

नमो ज्येष्ठाय च कनिष्ठाय च।
नमः पूर्वजाय चापरजाय च॥ १॥
नमो मध्यमाय चाऽप्रगल्भाय च।
नमो बुध्न्याय च जघन्याय च॥ २॥
नमः सोभ्याय च प्रतिसर्याय च।
नम आशुषेणाय चाशुरथाय च॥ ३॥
नमो बिल्मिने च कवचिने च।
नमो वर्मिणे च वरूथिने च॥ ४॥
नमः शूराय चावभेदिने च।
नमः श्रुताय च श्रुतसेनाय च॥ ५॥

नमो याम्याय च क्षेम्याय च।
नम उर्वर्याय च खल्याय च।। ६।।
नमः श्लोक्याय चावसान्याय च।
नमः श्रवाय च प्रतिश्रवाय च।
नमो वन्याय च कक्ष्याय च।। ७।।

अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजेभिरावृतम्।।

अग्निश्चम इन्द्रश्चमे, सोमश्चम, इन्द्रश्चमे, सविताचम, इन्द्रश्चमे, सरस्वती चम, इन्द्रश्चमे, पूषा चम, इन्द्रश्चमे, बृहस्पतिश्चम, इन्द्रश्चमे, मित्रश्चम, इन्द्रश्चमे, वरुणश्चम, इन्द्रश्चमे, धाताचम, इन्द्रश्चमे, त्वष्टा चम, इन्द्रश्चमे, मरुतश्चम, इन्द्रश्चमे, विश्वेदेवाश्चम, इन्द्रश्चमे, पृथिवीचम, इन्द्रश्चमे, अन्तरिक्षं चम, इन्द्रश्चमे, द्यौश्चम, इन्द्रश्चमे, समाश्चम, इन्द्रश्चमे, नक्षत्राणि चम, इन्द्रश्चमे, दिशश्चम, इन्द्रश्चमे।। यज्ञेन कल्पताम्।।

नमो दुन्दुभ्यायचाहनन्याय च।
नमो धृष्णवे च प्रमृशाय च।।
नमो निषिङ्गिणे चेषुधिमते च।
नमस्तीक्ष्णेषवे चायुधिने च, नमः सायुधायच सुधन्वनेच।।
नमः सृत्याय च पथ्याय च।
नमः काट्याय च नीप्याय च।।
नमो नाद्याय च वैशन्ताय च।
नमः कुल्याय च सरस्याय च।।
नमः कूट्याय चावट्याय च।
नमो वर्ष्याय चाऽवर्ष्याय च।।
नमो मेध्याय च विद्युत्याय च।
नमो वीध्र्याय चातप्याय च।।

नमो वात्याय च रेष्म्याय च।
नमो वास्तव्याय च वास्तुपाय च॥

अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजेभिरावृतम्॥

अंशुश्चमे, रश्मिश्चमे, अदाभ्यश्चमे, अधिपतिश्चम, उपांशुश्चमे, अन्तर्यामश्चम, ऐन्द्रावायवश्चमे, मैत्रावरुणश्चम, आश्विनश्चमे, प्रतिप्रस्थानश्चमे, शुक्रश्चमे, मन्थीचम, आग्रायणश्चमे, क्षुल्लक-वैश्वदेवश्चमे, ध्रुवश्चमे, वैश्वानरश्चम, ऐन्द्राग्नश्चमे, वैश्वदेवश्चमे, मरुत्वतीयश्चमे, महेन्द्रीयश्चमे, सावित्रश्चमे, सारस्वतश्चमे, पत्नीवतश्चमे, हारियोजनश्चमे॥ यज्ञेन कल्पताम्॥

नमः सोमाय च रुद्राय च।
नमस्ताम्राय चारुणाय च॥
नमः शङ्गवे च पशुपतये च।
नम उग्राय च भीमाय च॥
नमो हन्त्रे च हनीयसे च।
नमोऽग्रेवधाय च दूरेवधाय च॥
नमो वृक्षेभ्यो हरिकेशेभ्यो।
नमस्ताराय॥
नमः शम्भवे च मयोभवे च।
नमः शङ्कराय च मयस्कराय च॥
नमः शिवाय च शिवतराय च।
नमः किंशल्याय च क्षयणाय च॥

अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः द्युम्नैर्वाजेभिरावृतम्॥

इध्माचमे, स्त्रुचश्चमे, चमसश्चमे वायव्यानि च मे, द्रोणकलशश्चमे, पूतभृच्चमे, अपूतभृच्चमे, ग्रावाणश्चमे, अधिषवणश्चमे,

अवभृथश्चमे, स्वगाकारश्चमे।। यज्ञेन कल्पताम्।।

नम इरिण्याय च प्रपथ्याय च।
नमः पुलस्तिने च कपर्दिने च।।
नमो गोष्ठ्याय च गृह्याय च।
नमस्तल्प्याय च गेह्याय च।।
नमः पर्यायचावार्याय च।
नमः प्रतरणाय चोत्तरणाय च।।
नमस्तीर्थ्याय च कुल्याय च।
नमः फेन्याय च शिष्प्याय च।।
नमः सिकत्याय च प्रवाह्याय च।
नमो ह्रदव्याय च निवेष्प्याय च।।
नमः काट्याय च गह्वरेष्ठ्याय च।
नमः शुष्क्याय च हरित्याय च।।
नमो लोप्याय चोलप्याय च।
नमः पांसव्याय च रजस्याय च।।
नमः सूर्म्याय चोर्म्याय च।
नमः पर्ण्याय च पर्णशादाय च।।
नम आखिदते च प्रखिदते च।
नमोऽभिघ्नते चापगुरमानाय च।।
नमः आखिदाय च विखिदाय च।।
नमो वः किरिकेभ्यो, देवानां ह्रदयेभ्यो।
नमो विचिनुत्केभ्यो, नमो विक्षीणकेभ्यो, नम आनिर्हतेभ्यः।।
अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजेभिरावृतम्।।
अग्निश्चमे, घर्मश्चमे, अर्कश्चमे सूर्यश्चमे, प्राणश्चमे, अश्वमेधश्चमे, पृथिवीचमे, दितिश्चमे, अदितिश्चमे, द्यौश्चमे, शक्करीरङ्गुलयो

दिशश्चमे, यज्ञेन कल्पतां, व्रतं चर्तुश्च संवत्सरश्च तपश्चाहोरात्रे, ऊर्वष्ठीवे बृहद्रथन्तरश्चमे॥ यज्ञेन कल्पताम्॥

द्रापे अन्धसस्पते दरिद्र नीललोहित, आसां प्रजानामेषां पुरुषाणामेषां पशूनां माभैर्मा रुङ्मा नः किञ्चनाऽममत्, इमा रुद्राय तवसे कपर्दिने क्षयद्वीरायप्रभरामहे मतीः।

यथा नः शमऽसद्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्। या ते रुद्र शिवा तनूः शिवा विश्वाहभेषजीः, शिवारुद्रस्य भेषजी तया नो मृड जीवसे। परिणो रुद्रस्य हेतिर्वृणक्तु परित्वेषस्य दुर्मतेरघायोः, अवस्थिरा मघवद्भ्यस्तनुषु मीढुस्तो-काय तनयाय मृड। मीढुष्टम शिवतम शिवो नः सुमना भव, परमेवृक्ष आयुधन्निधाय कृत्तिं वसान उच्चर पिनाकम्। बिभ्रदुच्चर विकिरिड विलोहित नमस्ते अस्तु भगवः, यास्ते सहस्त्रं हेतयोऽन्येऽस्मन्निव पान्तु ताः॥

अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजेभिरावृतम्॥

गर्भाचमे, वत्साचमे, त्र्यविच्चमे, त्र्यवी चमे, दित्यवाट् चमे, दित्यौहीचमे, पञ्चाविच्चमे, पञ्चावीचमे, त्रिवत्साश्चमे, त्रिवत्सचमे, तुर्यवाट्चमे, तुर्यौहीचमे,पष्टवाट्चमे, पष्टौहीचम, उक्षाचमे, वशाचमे, अनड्वांश्चमे, धेनुश्चम, ऋषभश्चमे, वेहश्चमे॥ यज्ञेन कल्पताम्॥

सहस्त्रधा सहस्त्राणि हेतयस्तव बाह्वोः।
तासामीशानो भगवः पराचीना मुखाकुरु॥
असंख्याताः सहस्त्राणि ये रुद्रा अधिभूम्याम्।
तेषां सहस्त्रयोजनेऽव धन्वानि तन्मसि॥ १॥
येऽस्मिन्महत्यऽर्णवेऽन्तरिक्षे भवा अधि।
तेषां सहस्त्रयोजनेऽव धन्वानि तन्मसि॥ २॥

ये नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपाश्रिताः।
तेषां सहस्त्रयोजनेऽव धन्वानि तन्मसि॥ ३॥

ये नीलग्रीवाः शितिकण्ठा शर्वा अधःक्षमाचराः।
तेषां सहस्त्रयोजनेऽव धान्वानि तन्मसि॥ ४॥

ये वनेषु शिष्पिञ्जरा नीलग्रीवा विलोहिताः।
तेषां सहस्त्रयोजनेऽव धन्वानि तन्मसि॥ ५॥

येऽन्नेषु विविध्यन्ति पात्रेषु पिबतोजनान्।
तेषां सहस्त्रयोजनेऽव धन्वानि तन्मसि॥ ६॥

ये भूतानामधिपतयो विशिखासः कपर्दिनः।
तेषां सहस्त्रयोजनेऽव धन्वानि तन्मसि॥ ७॥

ये पथीनां पथि रक्षय ऐड मृदाय व्युधः।
तेषां सहस्त्रयोजनेऽव धन्वानि तन्मसि॥ ८॥

ये तीर्थानि प्रचरन्ति सृकावन्तो निषिङ्गिणः।
तेषां सहस्त्रयोजनेऽव धन्वानि तन्मसि॥ ९॥

य एतावन्तो वा भूयांसो वा दिशो रुद्रा वितिष्ठिरे।
तेषां सहस्त्रयोजनेऽव धन्वानि तन्मसि॥ १०॥

ॐ नमो अस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीची र्दशोदीचीर्द्शोर्ध्वा स्तेभ्यो नमो अस्तु, ते नो मृडयन्तु, ते यं द्विष्मो यश्चनो द्वेष्टि तमेषां जम्भे दध्मः॥ १॥

ॐ नमो अस्तु रुद्रेभ्यो ये अन्तरिक्षे, येषां वातमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीची र्दशोदीची र्दशोर्ध्वा स्तेभ्यो नमो अस्तु, ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः॥ २॥

ॐ नमो अस्तु रुद्रेभ्यो ये पृथिव्यां, येषामऽन्नमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो अस्तु, नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः।। ३।।

अग्नाविष्णू सजोषसा इमा वर्धन्तु वां गिरः, द्युम्नैर्वाजेभिरावृतम्।।

एकाचमे, तिस्त्रश्चमे, तिसृश्चमे, त्रयस्त्रिंशच्चमे, चतस्त्रश्चमे, अष्टौचमे, अष्टचमे, अष्टाचत्वारिंशत् चमे, वाजश्च, प्रसवश्चाऽ-पिजश्च क्रतुश्च वाक्पतिश्च वसुश्च स्वर्मौर्धो मूर्धावैयशनो व्यश्वाँन आन्त्योऽन्त्यो भौवनो भुवनस्य पतिः प्रजापतिरधि-पतिरियन्ते राण्मित्रो यन्तासि यमन ऊर्जेत्वा वृष्टचैत्वा प्रजानां त्वाऽधिपत्याय, आयुर्यज्ञेन कल्पतां, मनो यज्ञेनकल्पतां, प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेनकल्पतां, श्रोत्रं यज्ञेन कल्पतां, वाग्यज्ञेन कल्पतामाऽऽत्मा यज्ञेन कल्पतां, ब्रह्मा यज्ञेन कल्पतां, पृष्ठं यज्ञेन कल्पतां, यज्ञो यज्ञेन कल्पताम्।।

ऋक्च सामश्च स्तोमश्च यजुश्च बृहद्रथन्तरश्च स्वर्देवा अगन्म प्रजापतेः प्रजा अभूवन्नऽमृता अभूम वेट्स्वाहा।।

वाजस्य नु प्रसवा इति षट्''।।

ॐ विश्वे अद्य मरुतो विश्व ऊतीर्विश्वे भवन्त्वऽग्नयः समिद्धाः। विश्वे मादेवा अवसा गमन्निह विश्वमस्तु द्रविणं वाजे अस्मिन्।। १।।

आ[१] मा वाजस्य प्रसवो जगम्यादाऽमा द्यावापृथिवी विश्वरूपे। आ मा गन्तां पितरा मातरा चामा सोमो अमृतत्वेन गम्यात्।। २।।

वाजस्य नु प्रमवे मातरं महीमदितिं नाम वचसा करामहे। यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म

साविषत्॥ ३॥

वाजो मा सप्त प्रदिशश्चतस्रो वा परावतः।
वाजो मा विश्वैर्देवैर्धनसाता इहावतु॥ ४॥

वाजो मे अद्य प्रसुवातिदानं वाजो देवान् हविषा वर्धयाति।
वाजस्य हि प्रसवेनान्नमिति विश्वा आशा वाजपतिर्जयेयम्॥ ५॥

वाजः पुरस्तादुत मध्यतो नो वाजो देवानृतुभिः कल्पयाति।
वाजस्य हि प्रसवेनान्नमेति सर्वा आशा वाजपतिर्भवेयम्॥ ६॥

सं मा सृजामि पयसः पृथिव्याः सं मा सृजाम्यद्भिरौषधीभिः।
सोऽहं वाजस्य नौम्यग्नेः॥ ७॥

"तेजोसि" पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे
पयोधाः पयस्वतीः प्रदिशः सन्तु मह्यम्॥
तर्पणम्॥

मद्यं पीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां विधाय।
भस्मच्छन्नो भस्मशय्यांशयानो रुद्राध्यायी मुच्यते सर्वपापैः॥ १॥

नित्यं दण्डी नित्य यज्ञोपवीती नित्यं ध्याता भस्मना कर्मबन्धी।
रुद्रं दृष्ट्वा देवमीशानमुग्रं याति स्थानं तेन साकं तदीयम्॥ २॥

अनेन रुद्रमन्त्रसहित चमकानुवाक् पाठेन/स्नानेन/होमेन/
पुष्पार्चनेन/आत्मनो वाङ्मनः कायोपार्जितपापनिवारणार्थं
सद्गुरुप्रसादप्राप्त्यर्थं भगवान्, भवो देवः ८ शतरुद्रेश्वरः,
मृत्युञ्जयभट्टारकः पार्वतीसहितः परमेश्वरः अमृतेश्वर भैरवः
प्रीयतां प्रीतोऽस्तु॥

॥ जय गुरुदेव॥

श्रीमद्भगवद्गीता में कहा है–

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मां प्रापयन्ति ते।।

जो मुझे, सदा समाहित होके प्रीति के साथ बिना भूले पूजा करते हैं, मैं उन्हें वह बुद्धियोग प्रदान करता हूँ जिससे वे मुझे प्राप्त कर सकते हैं और दूसरों के लिए भी मेरी प्राप्ति का कारण बन सकते हैं। इस प्रकार योगीश्वर श्रीकृष्ण हमें सिखाते हैं कि वह उनकी संपूर्ण रूप से रक्षा करते हैं और सब कुछ उनके भोग के लिए तैयार रखते हैं, जो वास्तविक रूप से ईमानदार हों।।